# Lambodara Stuti by Devarshi

# લમ્બોદરસ્તુતિઃ દેવર્ષિભિઃ પ્રોક્તા

## Document Information

Text title : Lambodara Stuti by Devarshi

File name : lambodarastutiHdevarShibhiHproktA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 5, Adhyaya 9

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# લમ્બોદરસ્તુતિઃ દેવર્ષિભિઃ પ્રોક્તા

બ્રહ્મોવાચ -
એવં ક્રોધાસુરં શાન્તં દૃષ્ટ્વા દેવર્ષયોઽમલાઃ ।
હર્ષયુક્તા વિશેષેણ પુપૂજુર્ગણનાયકમ્ ॥ ૧॥

પૂજયિત્વા વિધાનેન નેમુર્લમ્બોદરં પુનઃ ।
તતસ્તં તુષ્ટુવુઃ સર્વે ભક્તિ નમ્રાત્મકન્ધરાઃ ॥ ૨॥

દેવર્ષય ઊચુઃ
શ્રેષ્ઠં પ્રધાનં સકલાદિભૂતં સર્વાન્તગં પૂર્ણમનન્તભાવમ્ ।
નિત્યં નિજાત્માનમચિન્ત્યસંસ્થં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૩॥

બોધેન હીનં સ્વસુખે નિમગ્નં બીજાત્મકં સાઙ્ખ્યમનન્તવેદ્યમ્ ।
વૈદેહયોગેન ચ લભ્યમેવં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૮॥

જીવં પરાનન્દમયં પરેશં બોધસ્વરૂપં પ્રકૃતેર્લયસ્થમ્ ।
દેહૈર્વિહીનં ચ તદાત્મહીનં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૫॥

સોઽહં સદા ભેદવિવર્જિતં વૈ દેહાત્મયોગં સકલાવભાસમ્ ।
નિત્યં પુરાણં પુરુષં ગણેશં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૬॥

બિન્દુસ્વરૂપં મનસાઽથ ગમ્યં પાદૈર્વિહીનં ચ ચતુષ્પદં યમ્ ।
નાનાત્મભેદાશ્રિતમેકદન્તં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૭॥

નાદસ્વરૂપં ચ ગુણેશમેકં સર્વત્ર ચક્ષુઃશ્રુતિતુણ્ડભૂતમ્ ।
સર્વત્ર હસ્તોદરપાદપદ્મં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૮॥

સંસ્થં સુષુમ્નૌ સમભાવદં વૈ દ્વન્દ્વજ્ઞમાદ્યં દ્વિવિધાવભાસમ્ ।
આનન્દકન્દં તમસા વિભાન્તં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૯॥

સૂક્ષ્મસ્વરૂપં ચ તથાન્તરસ્થં સર્વજ્ઞમાદ્યં ગણનાયકં યમ્ ।
વિજ્ઞાનકોશસ્થવિહારકારં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૦॥

સ્થૂલસ્વરૂપં સકલાભિમાનં શ્રેષ્ઠં રજોયુક્તમનન્તમાદ્યમ્ ।
અન્નાત્મભોગેષુ વિહારસિદ્ધં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૧॥

અધ્યાત્મરૂપં તમસા ચરન્તં દ્રવ્યપ્રકાશં પરમાર્થભૂતમ્ ।
દેહેન્દ્રિયજ્ઞાનમયં ચ ઢુણ્ઢિં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૨॥

નિત્યં રજોદેહવિકારગં વૈ કર્મસ્વરૂપં વિવિધેન્દ્રિયસ્થમ્ ।
તજ્જાધિભૂતાત્મકમપ્રમેયં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૩॥

જ્ઞાનસ્વરૂપં સકલામરસ્થં સર્વેન્દ્રિયજ્ઞાનકરં પ્રભું વૈ ।
તજ્જાધિદૈવપ્રચુરં મહાન્તં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૪॥

આકાશરૂપં સકલાવભાસં નાદપ્રપૂરં સકલાભિભૂતમ્ ।
ભૂતૈઃ સદા ખેલકમાદિનાથં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૫॥

વાયુસ્વરૂપં જગદેકચાલં પ્રાણાદિસંસ્થં સ્વવિભાગદં યમ્ ।
દેહપ્રચારં દશનામભિશ્ચ લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૬॥

તેજઃસ્વરૂપં સકલાવભાસં દ્વન્દ્વપ્રચારં જઠરે સુસંસ્થમ્ ।
સન્ધૌ સદા વ્યાપ્ય વિભાગકારં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ । ૧૭
જલસ્વરૂપં રસયુક્તમેવ પુષ્ટિપ્રદં ષડ્રસગં પરેશમ્ ।
નિત્યાર્દ્રભાવસ્ય પ્રકાશદં યં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૮॥

પૃથ્વીસ્વરૂપં ચ ધરાધરેશં સર્વાન્નમૂલં વિવિધૌષધિસ્થમ્ ।
આકારરૂપં ચ ગજાનનં વૈ લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૧૯॥

વિરાટ્સ્વરૂપસ્થમનન્તપારં સર્વત્ર નેત્રં ચ સહસ્રશીર્ષમ્ ।
સર્વત્ર હસ્તાનનપાદકાદિં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૨૦॥

રજોયુતં સૃષ્ટિકરં દ્વિજેશં આદિસ્વરૂપં પ્રપિતામહં યમ્ ।
સમાનભાવેન સુરાસુરસ્થં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૨૧॥

સત્વપ્રચારં હરિરૂપધારં યં તામસં શઙ્કરવેષસંસ્થમ્ ।
સૂર્યપ્રચારં જગદમ્બિકાગં લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૨૨॥

ઇત્યાદિભેદૈઃ સુવિરાજમાનં સર્વૈર્વિહીનં તુ કથં વયં સ્તુમઃ ।
દેવાઃ શિવાદ્યાશ્ચ વિકુણ્ઠિતા વૈ લમ્બોદરં તં ચ વયં નતાઃ સ્મઃ ॥ ૨૩॥

બ્રહ્મોવાચ -
સ્તુત્વા દેવર્ષયસ્ત્વેવં પ્રણેમુસ્તે ગજાનનમ્ ।

લમ્બોદરસ્તાન્ ઉવાચ મહાભાગાન્ સુસિદ્ધિદઃ ॥ ૨૪॥

ભવત્કૃતમિદં સ્તોત્રં ભવેન્મત્પ્રીતિવર્ધનમ્ ।
પઠતાં શૃણ્વતાં સદ્યઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૫॥

ધર્માર્થકામમોક્ષાણાં સાધનં બ્રહ્મદં પરમ્ ।
ભવિષ્યતિ સદા માન્યં સર્વકાર્યેષુ સર્વદા ॥ ૨૬॥

મારણોચ્ચાતનાદીનિ સ્તોત્રેણૈવ સુરર્ષયઃ ।
ભવિષ્યતિ ન સન્દેહઃ પરકૃત્યવિનાશનમ્ ॥ ૨૭॥

પુત્રપૌત્રાદિકં સર્વં લભતે સ્તોત્રપાઠતઃ ।
ધનધાન્યકલત્રાદિ સુખં વિન્દતિ માનવઃ ॥ ૨૮॥

કારાગૃહગતં સદ્યો મોચયેત્ સ્તોત્રપાઠતઃ ।
હૃદીપ્સિતં લભેત્ સર્વમેકવિંશતિવારત ॥ ૨૯॥

એકવિંશતિપાઠાંશ્ચ સ્તોત્રસ્યાસ્ય કરિષ્યતિ ।
સ સદ્યો હિ ફલં ભુક્તં એકવિંશદ્દિનાવધિ ॥ ૩૦॥

ઇતિ દેવર્ષિભિર્પ્રોક્તા લમ્બોદરસ્તુતિઃ સમાપ્તા । ૫.૯

Encoded by Ajit Krishnan

Proofread by Ajit Krishnan, PSA Easwaran

*Lambodara Stuti by Devarshi*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*